# ॥ मन्त्रपुष्पम् ॥

ॐ यो॑ऽपां पुष्पं॒ वेद॑ । पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति । च॒न्द्रमा॒ वा अ॒पां पुष्पम्᳚ ।
पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

अ॒ग्निर्वा अ॒पामा॒यत॑नम् । आ॒० । यो᳚ऽग्नेरा॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वा अ॒ग्नेरा॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

वा॒यु॒र्वा अ॒पामा॒यत॑नम् । आ॒० । यो वा॒योरा॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वै वा॒योरा॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

अ॒सौ वै तप॑न्नपामा॒यत॑नम् । आ॒० । यो॑ऽमुष्य॒तप॑त आ॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वा अ॒मुष्य॒ तप॑त आ॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम् । आ॒० । यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

नक्ष॑त्राणि॒ वा अ॒पामा॒यत॑नम् । आ॒० । यो नक्ष॑त्राणामा॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वै नक्ष॑त्राणामा॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम् । आ॒० । यः प॒र्जन्य॑स्या॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वै प॒र्जन्य॑स्या॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒० ।

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑नम् । आ॒० । यः सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒० ।
आपो॒ वै सं॑वत्स॒रस्या॒यत॑नम् । आ॒० । य ए॒वं वेद॑ । यो᳚ऽप्सु नावं॒ प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒वति॑ष्ठति ।

ॐ रा॒जा॒धि॒रा॒जाय॑ प्रसह्यसा॒हिने᳚ । नमो॑ व॒यं वै᳚श्रव॒णाय॑ कुर्महे । स मे॒ कामा॒न्काम॒कामा॑य॒
म॒ह्यम्᳚ । का॒मे॒श्व॒रो वै᳚श्रव॒णो द॑दातु । कु॒बे॒राय॑ वैश्रव॒णाय॑ । म॒हा॒रा॒जाय॒ नमः॑ ।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः